শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রী সৌম্যনারাযণ ৱিরচিতা

# ॥ তিরুপ্পাৱৈপদ্যানাং সংস্কৃতশ্লোকাঃ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ তিরুপ্পাৱৈপদ্যানাং সংস্কৃতশ্লোকাঃ ॥

মাসে ৱৈ মার্গশীর্ষাখ্যে মাপতের্মহতীং কৃপাম্।
প্রাপ্তুকামাঃ হি গোপ্যস্তাঃ আচরন্নু ৱ্রতং শুভম্॥ **1** ॥

কৃত্যানাং চৈৱ করণম্ অকৃত্যানাঞ্চ ৱর্জনম্।
উজ্জীৱনার্থং ষণ্মার্গং ৱিধায ৱ্রতমাচরন্॥ **2** ॥

অতিৱৃষ্ট্যানতিৱৃষ্ট্যা হ্যশুভং নৈৱ সংভৱেৎ।
সমগ্রদেশে গোৱৃদ্ধিঃ ধনধান্যমযী ভৱেৎ॥ **3** ॥

মার্গশীর্ষৱ্রতার্থং হি মাধৱস্য প্রিযাত্মনাম্।
কালমেঘঃ কৃপারূপী ৱর্ষং ৱর্ষযতু স্বযম্॥ **4** ॥

মাযিনং মধুরানাথং যামুনেযং মহানিধিম্।
স্মৃৎৱা সংপূজ্য সঙ্কীর্ত্য শুদ্ধা ভূৎৱাঽঽপ্নুযাৎ শুভম্॥ **5** ॥

তার্ক্ষ্যধ্ৱজগৃহেশস্য শঙ্খনাদং মুনের্জপম্।
নাশৃণোঃ কিন্নু বালে ৎৱম্ উত্তিষ্ঠ ৱ্রতমাচর॥ **6** ॥

ভরদ্ৱাজরুতং তারং গোপীনাং দধিমন্থনম্।
নাশৃণোঃ কিঞ্চ পৈশাচে কেশৱং চৈহি কীর্তয॥ **7** ॥

প্রাতর্গাৱঃ চারযদ্ভ্যঃ গোপেভ্যঃ পূর্ৱগাঃ ৱযম্।
কৃষ্ণতৃষ্ণাসমেতে ৎৱং বকারিং চৈহি ভাৱয॥ **8** ॥

ভাগিনেযে মাতুলানি ! মণিদ্ৱারমপাৱৃণু।
ৎৱৎসুতা বধিরা মূকা কিমুত্থাপয সংপ্রতি॥ **9** ॥

তুলসীগন্ধচূডাঙ্গং স্তোতুমাযাহি সাংপ্রতম্।
জিতকুম্ভশ্রুতের্নিদ্রাং ত্যকত্বা মাতঃ শুভে ৎৱর॥ **10**॥

স্বর্ণলতে শুভাঙ্গে চ সখীজনাস্তৱাঙ্গনে।
সমাগতাস্সমুত্তিষ্ঠ শীঘ্রমাযাহি মাঽহলপ॥ **11**॥

ৱাৎসল্যভরিতৈর্গোভিঃ দুগ্ধৈঃ ক্লিন্নধনি স্বসে।
মনোভিরামং মান্যার্থং মা গাঃ নিদ্রাং ৎৱর প্রিযে॥ **12**॥

ৱিহঙ্গাসুরৱিধ্ৱংসং কীর্তনায মিতাস্ত্রিযঃ।
ৱিশ্লেষং কিং ৱিনা নিদ্রাং অকরোঃ কুড্মলেক্ষণে॥ **13**॥

বাহ্যাঙ্গনেষু ৱাপীষু কল্হারাঃ ফুল্লতামিতাঃ।
শঙ্কচক্রধরং দেৱং কীর্তয ৎৱং গতাঃ বুধাঃ॥ **14**॥

কীরকে কিমু নিদ্রাসি পুরা যামি ন নিন্দ্যতাম্।
দুষ্টাঽভৱং ৎৱহং তাৱৎ মাযিনং মানয ৎৱর॥ **15**॥

নন্দগোপগৃহদ্বারপাল দ্বারমপাৱৃণু।
মণিৱর্ণসুবোধার্থং মনোদ্বারমপাৱৃণু॥ **16**॥

ৱস্ত্রপানান্নসংধাতঃ যশোদে নন্দগোপ হে।
ত্রিৱিক্রম প্রলংবঘ্ন নিদ্রাং ত্যজত সাংপ্রতম্॥ **17**॥

মত্তৱারণঘর্ষাংসৱধূনীলে সুকেশিনি।
মাধৱীগুল্মৱিহগঃ রৌতি দ্বারমপাৱৃণু॥ **18**॥

ৱাল্লভীপঞ্চশযনসুপ্তনীলোন্নতস্তনে।
ভণ কজ্জলসন্নেত্রি নিদ্রাযাঃ ৱিরমস্ব তে॥ **19**॥

দেৱক্লেশাপহারিন্ ৎৱং শৌরে শূর ৱিবোধতু।
তাম্রাভমৃদুৱক্ষোজে দর্পণৈস্তং ৱিবোধয॥ **20**॥

ভূরিভাজনগৱ্যাত্মসুততল্লজ জাগৃহি।
জগজ্জ্যোতে হি শত্রুঘ্ন ৎৱৎপাদশরণং ব্রজে॥ **21**॥

ভগ্নাভিমানভূপাভাঃ ৱযং ৎৱাং শরণং ৱৃতাঃ।
সোমসূর্যনিভাক্ষিন্ তে হ্যপাঙ্গৈর্দুরিতং হর॥ **22**॥

দুর্দিনেষু গুহান্তস্স্থমৃগরাজনিভপ্রভো।
অতসীপুষ্পনেত্র ৎৱং হরি পীঠে ৱিরাজয॥ **23**॥

ত্রিৱিক্রম শ্রিযা লঙ্কা শকটাসুরভঞ্জন।
ৱৎসারে গিরিধারিন্ ৎৱং কৃপযা রক্ষ নো ব্রজান্॥ **24**॥

কস্যাশ্চিদ্গর্ভসংভূত কযাচিৎপোষিত প্রভো।
কংসারে পূজযামস্ত্বাং ৎৱযা ত্রাতাঃ শুভৈর্ৱৃতাঃ॥ **25**॥

মণিৱর্ণিন্ মহামাযিন্ জ্যেষ্ঠানাং করণং শৃণু।
শঙ্খৱাদ্যধ্ৱজাদীন্নো ৱটশাযিন্ প্রযচ্ছ তান্॥ **26**॥

হিতাহিতমনস্ক ৎৱৎকীর্তনে ভূষণাদিকান্।
ধৃৎৱা ক্ষীরান্নপানেন সংতুষ্টাঃ সমিতাস্সদা॥ **27**॥

গোচারণেন সংতুষ্টাঃ বালিশাঃ প্রাপ্য ৱোঽনঘ।
কিমন্যত্ত্বাং ৱিহাযাস্মদপরাধান্ ক্ষমস্ব ভোঃ॥ **28**॥

প্রাতস্সমেত্য সংসেৱ্য ৎৱৎপাদকমলং গতাঃ।
ন জহি স্যাম কিঙ্কর্যঃ ৎৱদ্ভক্তাঃ সপ্তজন্মসু॥ **29**॥

সুক্ষীরার্ণৱমন্থানমাধৱং কেশৱং ৱিভুম্।
ৱিষ্ণুচিত্তসুতাসূক্ত্যা যো ভজেৎস শুভং ৎৱিযাৎ॥ **30**॥

## সমাপনম্

কৃষ্ণায প্রতিবোধিতাং ভগৱতীশ্রীগোদযা চ স্বযম্
আর্যেণ গ্রথিতাং সুনাথমুনিনা দিৱ্যপ্রবন্ধান্তরাম্।
ৱেদান্তামৃতৱর্ষিণীং রসৱতীং ত্রিংশৎসুপদ্যাত্মিকাং
অম্ব ৎৱামনুসন্দধামি ভৱতীং ভক্তাঘসংহারিণীম্॥

॥ ইতি শ্রী তিরুপ্পাৱৈপদ্যানাং সংস্কৃতশ্লোকাঃ সমাপ্তাঃ ॥